श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री विष्णुधर्मोत्तरपुराणे दाल्भ्यपुलस्त्य संवादे

# ॥ श्री अपामार्जनस्तोत्रम् ॥

*This document* *

***Sunder Kidambi***

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री अपामार्जनस्तोत्रम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये॥

श्रीदाल्भ्य उवाच
भगवन् प्राणिनः सर्वे विषरोगाद्युपद्रवैः।
दुष्टग्रहाभिघातैश्च सर्वकालमुपद्रुताः॥ १ ॥

आभिचारिककृत्याभिः स्पर्शरोगैश्च दारुणैः।
सदा संपीड्यमानास्तु तिष्ठन्ति मुनिसत्तम॥ २ ॥

केन कर्मविपाकेन विषरोगाद्युपद्रवाः।
न भवन्ति नृणां तन्मे यथावद्वक्तुमर्हसि॥ ३ ॥

श्रीपुलस्त्य उवाच
व्रतोपवासैर्यैर्विष्णुर्नान्यजन्मनि तोषितः।
ते नरा मुनिशार्दूल विषरोगादिभागिनः॥ ४ ॥

यैर्न तत्प्रवणं चित्तं सर्वदैव नरैः कृतम्।
विषज्वरग्रहाणां ते मनुष्या दाल्भ्य भागिनः॥ ५ ॥

आरोग्यं परमामृद्धिं मनसा यद्यदिच्छति।
तत्तदाप्नोत्यसन्दिग्धं परत्राऽच्युततोषकृत्॥ ६ ॥

नाऽऽधीन् प्राप्नोति न व्याधीन् विषग्रहनिबन्धनम्।
कृत्यास्पर्शभयं वाऽपि तोषिते मधुसूदने॥ ७ ॥

www.prapatti.com

सर्वदुःखशमस्तस्य सौम्यास्तस्य सदा ग्रहाः।
देवानामपि तुष्टयै स यस्य तुष्टो जनार्दनः॥ ८ ॥

यः समः सर्वभूतेषु यथाऽऽत्मनि तथा परे।
उपवासादिदानेन तोषिते मधुसूदने॥ ९ ॥

तोषकास्तस्य जायन्ते नराः पूर्णमनोरथाः।
अरोगाः सुखिनो भोगान् भोक्तारो मुनिसत्तम॥ १० ॥

न तेषां शत्रवो नैव स्पर्शरोगादिभागिनः।
ग्रहरोगादिकं वापि पापकार्यं न जायते॥ ११ ॥

अव्याहतानि कृष्णस्य चक्रादीन्यायुधानि च।
रक्षन्ति सकलापद्भ्यो येन विष्णुरुपासितः॥ १२ ॥

श्रीदाल्भ्य उवाच
अनाराधितगोविन्दा ये नरा दुःखभागिनः।
तेषां दुःखाभिभूतानां यत् कर्तव्यं दयालुभिः॥ १३ ॥

पश्यद्भिः सर्वभूतस्थं वासुदेवं महामुने।
समदृष्टिभिरीशेशं तन्मम ब्रूह्यशेषतः॥ १४ ॥

श्रीपुलस्त्य उवाच
श्रोतुकामोऽसि वै दाल्भ्य शृणुष्व सुसमाहितः।
अपामार्जनकं वक्ष्ये न्यासपूर्वमिदं परम्॥ १५ ॥

ओं नमो भगवते वासुदेवाय सर्वक्लेशापहन्त्रे नमः

अथ न्यासः

अस्य श्रीमदपामार्जनस्तोत्रमहामन्त्रस्य।
श्रीपुलस्त्यो भगवान् ऋषिः।
अनुष्टुप् छन्दः।
श्रीवाराह नारसिंह वामन विष्णु सुदर्शना देवताः।

हराऽमुकस्य दुरितमिति बीजम्।
अच्युतानन्तगोविन्देति शक्तिः।
ज्वलत्पावकलोचनेति कीलकम्।
वज्रायुधनखस्पर्शेति कवचम्।
श्रीवाराहनारसिंहवामनविष्णुसुदर्शन प्रसादसिद्ध्यर्थे जपे विनियोगः।

वराहाय अङ्गुष्ठाभ्यां नमः।
नारसिंहाय तर्जनीभ्यां स्वाहा।
वामनाय मध्यमाभ्यां वषट्।
विष्णवे अनामिकाभ्यां हुम्।
सुदर्शनाय कनिष्ठिकाभ्यां वौषट्।
पाञ्चजन्याय करतलकरपृष्ठाभ्यां फट् नमः।
इति करन्यासः॥

## अथाङ्गन्यासः

वराहनरसिंहाय वामनाय महात्मने।
ज्ञानाय हृदयाय नमः (हृदये)
नमः कमलकिञ्जल्कपीतनिर्मलवाससे।
ऐश्वर्याय शिरसे स्वाहा (शिरसि)
नमः पुष्करनेत्राय केशवायाऽऽदिचक्रिणे।
शक्त्यै शिखायै वषट् (शिखायां)
दामोदराय देवाय अनन्ताय महात्मने।
बलाय कवचाय हुम् (पार्श्वयोः)
काश्यपायाऽतिह्रस्वाय ऋग्यजुःसाममूर्तये।
तेजसे नेत्राभ्यां वौषट् (नेत्रयोः)
ओं नमः परमार्थाय पुरुषाय महात्मने।
वीर्यायास्त्राय फट् (करतालः)
भूर्भुवःसुवरोमिति दिग्बन्धः॥



www.prapatti.com

## ध्यानम्

अथ ध्यानं प्रवक्ष्यामि सर्वपापप्रणाशनम्।
वराहरूपिणं देवं संस्मरन् अर्चयेज्जपेत्॥ १६ ॥

जलौघधाम्नः सचराचरा धरा विषाणकोटयाऽखिलविश्वरूपिणा।
समुद्धृता येन वराहरूपिणा स मे स्वयंभूर्भगवान् प्रसीदतु॥ १७ ॥

चञ्चच्चन्द्रार्धदंष्ट्रं स्फुरदुरुरदनं विद्युदुद्योतजिह्वम्
गर्जत्पर्जन्यनादं स्फुरितरविरुचिं चक्षुरक्षुद्ररौद्रम्।
त्रस्ताशाहस्तियूथं ज्वलदनलसटाकेसरोद्भासमानम्
रक्षोरक्ताभिषिक्तं प्रहरति दुरितं ध्यायतां नारसिंहम्॥ १८ ॥

अतिविपुलसुगात्रं रुक्मपात्रस्थमन्नम्
सललितदधिखण्डं पाणिना दक्षिणेन।
कलशममृतपूर्णं वामहस्ते दधानम्
तरति सकलदुःखं वामनं भावयेत् यः॥ १९ ॥

विष्णुं भास्वत्किरीटाङ्गदवलयगळाकल्पहारोज्ज्वलाङ्गम्
श्रोणीभूषासुवक्षोमणिमकुटमहाकुण्डलैर्मण्डिताङ्गम्।
हस्तोद्यच्छङ्खचक्रांबुजगदममलं पीतकौशेयमाशा-
विद्योतद्भासमुद्यद्दिनकरसदृशं पद्मसंस्थं नमामि॥ २० ॥

कल्पान्तार्कप्रकाशं त्रिभुवनमखिलं तेजसा पूरयन्तम्
रक्ताक्षं पिङ्गकेशं रिपुकुलदमनं भीमदंष्ट्राट्टहासम्।
शङ्खं चक्रं गदाब्जं पृथुतरमुसलं शूलपाशाङ्कुशाग्नीन्
बिभ्राणं दोर्भिराद्यं मनसि मुररिपुं भावये चक्रसंज्ञम्॥ २१ ॥

## स्तोत्रारम्भः

ओं नमः परमार्थाय पुरुषाय महात्मने।
अरूपबहुरूपाय व्यापिने परमात्मने॥ २२ ॥

www.prapatti.com

निष्कल्मषाय शुद्धाय ध्यानयोगरताय च।
नमस्कृत्य प्रवक्ष्यामि यत्र सिद्ध्यतु मे वचः॥ २३ ॥

नारायणाय शुद्धाय विश्वेशायेश्वराय च।
अच्युतानन्तगोविन्द पद्मनाभाय सौहृदे॥ २४ ॥

हृषीकेशाय कूर्माय माधवायाच्युताय च।
दामोदराय देवाय अनन्ताय महात्मने॥ २५ ॥

जनार्दनाय कृष्णाय उपेन्द्र श्रीधराय च।
त्रिविक्रमाय रामाय वैकुण्ठाय हराय च॥ २६ ॥

प्रद्युम्नायानिरुद्धाय पुरुषोत्तम ते नमः।
योगीश्वराय गुह्याय गूढाय परमात्मने॥ २७ ॥

भक्तप्रियाय देवाय विष्वक्सेनाय शार्ङ्गिणे।
अधोक्षजाय दक्षाय मत्स्याय मधुहारिणे॥ २८ ॥

वराहाय नृसिंहाय वामनाय महात्मने।
वराहेश नृसिंहेश वामनेश त्रिविक्रम॥ २९ ॥

हयग्रीवेश सर्वेश हृषीकेश हराशुभम्।
अपराजितचक्राद्यैश्चतुर्भिः परमाद्भुतैः॥ ३० ॥

अखण्डितानुभावैस्त्वं सर्वदुष्टहरो भव।
हराऽमुकस्य दुरितं दुष्कृतं दुरुपोषितम्॥ ३१ ॥

मृत्युबन्धार्तिभयदमरिष्टस्य च यत्फलम्।
परमध्यानसहितं प्रयुक्तं चाऽऽभिचारिकम्॥ ३२ ॥

गरस्पर्शमहारोगान् प्रयुक्तान् त्वरया हर।
ओं नमो वासुदेवाय नमः कृष्णाय शार्ङ्गिणे॥ ३३ ॥

नमः पुष्करनेत्राय केशवायाऽऽदिचक्रिणे।
नमः कमलकिञ्जल्कपीतनिर्मलवाससे॥ ३४ ॥

महाहवरिपुस्कन्धघृष्टचक्राय चक्रिणे।
दंष्ट्राग्रेण क्षितिधृते त्रयीमूर्तिमते नमः॥ ३५ ॥

महायज्ञवराहाय शेषभोगोपशायिने।
तप्तहाटककेशान्तज्वलत्पावकलोचन॥ ३६ ॥

वज्रायुधनखस्पर्श दिव्यसिंह नमोऽस्तु ते।
काश्यपायातिह्रस्वाय ऋग्यजुस्साममूर्तये॥ ३७ ॥

तुभ्यं वामनरूपाय क्रमते गां नमो नमः।
वराहाशेषदुष्टानि सर्वपापफलानि वै॥ ३८ ॥

मर्द मर्द महादंष्ट्र मर्द मर्द च तत्फलम्।
नरसिंह कराळास्य दन्तप्रान्तोज्ज्वलानन॥ ३९ ॥

भञ्ज भञ्ज निनादेन दुष्टान्यस्याऽऽर्तिनाशन।
ऋग्यजुस्सामरूपाभिर्वाग्भिर्वामनरूपधृक्॥ ४० ॥

प्रशमं सर्वदुष्टानां नयत्वस्य जनार्दनः।
कौबेरं ते मुखं रात्रौ रौद्रं सौम्यं मुखं दिवा॥ ४१ ॥

ज्वरान्मृत्युभयं घोरं विषं नाशयते ज्वरम्।
त्रिपाद्भस्मप्रहरणस्त्रिशिरा रक्तलोचनः।
स मे प्रीतः सुखं दद्यात् सर्वामयपतिज्वरः॥ ४२ ॥

आद्यन्तवन्तः कवयः पुराणाः
सन्मार्गवन्तो ह्यनुशासितारः।
सर्वज्वरान् घ्नन्तु ममानिरुद्ध-
प्रद्युम्नसङ्कर्षणवासुदेवाः॥ ४३ ॥

ऐकाहिकं द्व्याहिकं च तथा त्रिदिवसज्वरम्।
चातुर्थिकं तथाऽत्युग्रं तथैव सततज्वरम्॥ ४४ ॥

www.prapatti.com

दोषोत्थं सन्निपातोत्थं तथैवाऽऽगन्तुकं ज्वरम्।
शमं नयाऽऽशु गोविन्द छिन्धि छिन्ध्यस्य वेदनाम्॥ ४५॥

नेत्रदुःखं शिरोदुःखं दुःखं चोदरसंभवम्।
अतिश्वासमनुच्छ्वासं परितापं सवेपथुम्॥ ४६॥

गुदघ्राणाङ्घ्रिरोगांश्च कुक्षिरोगं तथा क्षयम्।
कामालादींस्तथा रोगान् प्रमेहांश्चातिदारुणान्॥ ४७॥

भगन्धरातिसारांश्च मुखरोगांसवल्गुलिम्।
अश्मरीं मूत्रकृच्छ्रं च रोगानन्यांश्च दारुणान्॥ ४८॥

ये वातप्रभवा रोगा ये च पित्तसमुद्भवाः।
कफोद्भवाश्च ये रोगा ये चान्ये सान्निपातिकाः॥ ४९॥

आगन्तुकाश्च ये रोगा लूतादिस्फोष्टकादयः।
सर्वे ते प्रशमं यान्तु वासुदेवापमार्जनात्॥ ५०॥

विलयं यान्तु ते सर्वे विष्णोरुच्चारणेन च।
क्षयं गच्छन्तु चाशेषाश्चक्रेणाभिहता हरेः॥ ५१॥

अच्युतानन्त गोविन्द विष्णो नारायणामृत।
रोगान् मे नाशयाशेषान् आशु धन्वन्तरे हरे॥ ५२॥

अच्युतानन्तगोविन्दनामोच्चारणभेषजात्।
नश्यन्ति सकला रोगाः सत्यं सत्यं वदाम्यहम्॥ ५३॥

सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते।
वेदाच्छास्त्रं परं नास्ति न दैवं केशवात्परम्॥ ५४॥

स्थावरं जङ्गमं चापि कृत्रिमं चापि यद्विषम्।
दन्तोद्भवं नखोद्भूतमाकाशप्रभवं विषम्॥ ५५॥

लूतादिस्फोटकं चैव विषमत्यन्तदुःसहम्।
शमं नयतु तत् सर्वं कीर्तितोऽस्य जनार्दनः॥ ५६॥

ग्रहान् प्रेतग्रहांश्चैव तथा वैनायिकग्रहान्।
वेतालांश्च पिशाचांश्च गन्धर्वान् यक्षराक्षसान्॥ ५७ ॥

शाकिनीपूतनाद्यांश्च तथा वैनायिकग्रहान्।
मुखमण्डलिकान् क्रूरान् रेवतीन् वृद्धरेवतीन्॥ ५८ ॥

वृश्चिकाख्यान् ग्रहांश्चोग्रान् तथा मातृगणानपि।
बालस्य विष्णोश्चरितं हन्तु बालग्रहानिमान्॥ ५९ ॥

वृद्धानां ये ग्रहाः केचित् ये च बालग्रहाः क्वचित्।
नरसिंहस्य ते दृष्ट्या दग्धा ये चापि यौवने॥ ६० ॥

सटाकराळवदनो नरसिंहो महारवः।
ग्रहानशेषान्निश्शेषान् करोतु जगतो हितः॥ ६१ ॥

नरसिंह महासिंह ज्वालामालोज्ज्वलानन।
ग्रहानशेषान्निश्शेषान् खाद खादाग्निलोचन॥ ६२ ॥

ये रोगा ये महोत्पाता यद्विषं ये महोरगाः।
यानि च क्रूरभूतानि ग्रहपीडाश्च दारुणाः॥ ६३ ॥

शस्त्रक्षते च ये दोषा ज्वालाकर्दमकादयः।
यानि चान्यानि दुष्टानि प्राणिपीडाकराणि च॥ ६४ ॥

तानि सर्वाणि सर्वात्मन् परमात्मन् जनार्दन।
किञ्चित् रूपं समास्थाय वासुदेवास्य नाशय॥ ६५ ॥

क्षिप्त्वा सुदर्शनं चक्रं ज्वालामालातिभीषणम्।
सर्वदुष्टोपशमनं कुरु देववराच्युत॥ ६६ ॥

सुदर्शन महाचक्र गोविन्दस्य करायुध।
तीक्ष्णपावकसङ्काश कोटिसूर्यसमप्रभ॥ ६७ ॥

त्रैलोक्यकर्ता त्वं दुष्टदृप्तदानवदारण।
तीक्ष्णधार महावेग छिन्धि छिन्धि महाज्वरम्॥ ६८ ॥



www.prapatti.com

छिन्धि पातं च लूतं च छिन्धि घोरं महद्भयम्।
कृमिं दाहं च शूलं च विषज्वालां च कर्दमान्॥ ६९ ॥

सर्वदुष्टानि रक्षांसि क्षपयाऽरिविभीषण।
प्राच्यां प्रतीच्यां दिशि च दक्षिणोत्तरयोस्तथा॥ ७० ॥

रक्षां करोतु भगवान् बहुरूपी जनार्दनः।
परमात्मा यथा विष्णुर्वेदान्तेष्वभिधीयते॥ ७१ ॥

तेन सत्येन सकलं दुष्टमस्य प्रशाम्यतु।
यथा विष्णुर्जगत्सर्वं सदेवासुरमानुषम्॥ ७२ ॥

तेन सत्येन सकलं दुष्टमस्य प्रशाम्यतु।
यथा विष्णौ स्मृते सद्यः संक्षयं यान्ति पातकाः॥ ७३ ॥

तेन सत्येन सकलं दुष्टमस्य प्रशाम्यतु।
यथा यज्ञेश्वरो विष्णुर्वेदान्तेष्वभिधीयते॥ ७४ ॥

तेन सत्येन सकलं यन्मयोक्तं तथाऽस्तु तत्।
शान्तिरस्तु शिवं चास्तु हृषीकेशस्य कीर्तनात्॥ ७५ ॥

वासुदेवशरीरोत्थैः कुशैः संमार्जितं मया।
अपामार्जतु गोविन्दो नरो नारायणस्तथा॥ ७६ ॥

ममास्तु सर्वदुःखानां प्रशमो याचनाद्धरेः।
शान्ताः समस्ता रोगास्ते ग्रहाः सर्वविषाणि च॥ ७७ ॥

भूतानि च प्रशाम्यन्तु संस्मृते मधुसूदने।
एतत् समस्तरोगेषु भूतग्रहभयेषु च।
अपामार्जनकं शस्त्रं विष्णुनामाभिमन्त्रितम्॥ ७८ ॥

एते कुशा विष्णुशरीरसंभवाः
जनार्दनोऽहं स्वयमेव चाऽऽगतः।

हतं मया दुष्टमशेषमस्य
स्वस्थो भवत्वेष यथा वचो हरेः॥ ७९ ॥

शान्तिरस्तु शिवं चास्तु प्रणश्यत्वसुखं च यत्।
स्वास्थ्यमस्तु शिवं चास्तु दुष्टमस्य प्रशाम्यतु॥ ८० ॥

यदस्य दुरितं किञ्चित् तत् क्षिप्तं लवणार्णवे।
स्वास्थ्यमस्तु शिवं चास्तु हृषीकेशस्य कीर्तनात्॥ ८१ ॥

एतद्रोगादिपीडासु जन्तूनां हितमिच्छता।
विष्णुभक्तेन कर्तव्यमपामार्जनकं परम्॥ ८२ ॥

अनेन सर्वदुष्टानि प्रशमं यान्त्यसंशयः।
सर्वभूतहितार्थाय कुर्यात् तस्मात् सदैव हि॥ ८३ ॥

कुर्यात् तस्मात् सदैव ह्रों नम इति।
इदं स्तोत्रं परं पुण्यं सर्वव्याधिविनाशनम्॥ ८४ ॥

विनाशाय च रोगाणामपमृत्युजयाय च।
इदं स्तोत्रं जपेच्छान्तः कुशैः संमार्जयेच्छुचिः॥ ८४ ॥

व्याध्यपस्मारकुष्ठादि पिशाचोरगराक्षसाः।
तस्य पार्श्वं न गच्छन्ति स्तोत्रमेतत्तु यः पठेत्॥ ८५ ॥

वाराहं नारसिंहं च वामनं विष्णुमेव च।
स्मरन् जपेदिदं स्तोत्रं सर्वदुःखोपशान्तये॥ ८६ ॥

॥ इति श्री अपामार्जनस्तोत्रं संपूर्णं ॥

www.prapatti.com